# Rajasthan Public Service Commission - 2018

## Paper : Sanskrit

Ques: 150
Time: 150 Minutes

---

Ques # :1

**अ-क-ख-ग-घ- एतेषामुच्चारणस्थानं किम् ?**

1) तालु:

2) मूर्धा

3) कण्ठ:

4) नासिका

---

Ques # :2

**सुबन्तानां तिङन्तानां च संज्ञा अस्ति -**

1) सवर्णम्

2) पदम्

3) इत्

4) संहिता

---

Ques # :3

**व्यञ्जनवर्णस्य इत्संज्ञकं सूत्रं निर्धारयत-**

1) उपदेशेऽनुनासिक इत्

2) हलन्त्यम्

3) इतश्च

4) इतश्च लोप:

---

Ques # :4

**संयोगसंज्ञाविधायकं सूत्रं किम् ? तन्निर्धारयत-**

1) संयोगान्तस्य लोप:

2) संयोगे गुरु:

3) हलोऽनन्तरा संयोग:

4) अलोऽन्त्यस्य

---

Ques # :5

**'संहिता' इत्यस्याः संज्ञाविधायकं सूत्रं निर्धारयत-**

1) संयोगान्तस्य लोप:

2) पर: सन्निकर्ष:

3) ग्रन्थ:

4) पदम्

---

Ques # :6

**निम्नलिखितेषु सुबन्तपदं निर्धारयत -**

1) नदी

2) जगाम

3) पपाठ

4) अपश्यत

---

Ques # :7

**'यण्' प्रत्याहारस्य वर्णानां का संज्ञा भवति ?**

1) ऊष्मसंज्ञा |

2) अन्त:स्थसंज्ञा |

3) जिह्वामूलीयसंज्ञा |

4) कण्ठोष्ठ संज्ञा |

---

Ques # :8

**आभ्यन्तरप्रयत्नः कतिविधः ?**

1) द्विविधः
2) त्रिविधः
3) सप्तविधः
4) पञ्चविधः

---

Ques # :9

**' अनु+अयः ' इत्यस्य सन्धिरूपमस्ति -**

1) अन्वयः
2) अनूयः
3) अनयः
4) अन्यः

---

Ques # :10

**' हरी एतौ' इत्यस्य सन्धिरूपमस्ति -**

1) हर्येतौ
2) हरेतौ
3) हरी एतौ
4) हर्यातौ

---

Ques # :11

**' दिक् नागः ' इत्यस्य सन्धिरूपमस्ति-**

1) दिक्नागः
2) दिञ्नागः
3) दिङ्नागः
4)

दिण्णागः

---

Ques # :12

**' सच्छीलः' इत्यस्य सन्धिविच्छेदोऽस्ति -**

1) सच् + छिलः

2) सच् + शिलः

3) सम् +शीलः

4) सत् + शीलः

---

Ques # :13

**'उल्लेखः ' इत्यस्य सन्धिविच्छेदोऽस्ति -**

1) उद्+लेखः

2) उल्+लेखः

3) उल् + लखः

4) उङ्+लेखः

---

Ques # :14

**'लाकृतिः ' इत्यत्र कः सन्धिः ?**

1) दीर्घसन्धिः

2) यण् सन्धिः

3) गुणसन्धिः

4) वृद्धिसन्धिः

---

Ques # :15

**'एचोऽयवायावः' इत्यनेन सूत्रेण 'अव्' इत्यादेशः कस्य वर्णस्य स्थाने भवति ?**

1) ओ

2) ए

3) ऐ

4) औ

---

Ques # :16

**निम्नलिखितेषु 'मात्रादेश:' इति अस्य प्रयोगस्य सिद्ध्यर्थं शुद्धसन्धिविच्छेद: क: ?**

1) मात्र+त्रादेश

2) मातृ+रादेश

3) मातृ+आदेश

4) मात्रा+देश

---

Ques # :17

**'उपोषति' इत्यत्र क: सन्धि: ?**

1) पूर्वरूपसन्धि:

2) गुणसन्धि:

3) वृद्धिसन्धि:

4) पररूपसन्धि:

---

Ques # :18

**'तट्टीका' इत्यस्य प्रयोगस्य शुद्धसंधिविच्छेद: क: ?**

1) तन् + टीका

2) तद् + टीका

3) तात + टीका

4) तात् + टीका

---

Ques # :19

**' वागीश: ' प्रयोगोऽयं कस्य सन्धेः उदाहरणं वर्तते ?**

1) दीर्घसन्धि:

2) श्चुत्वसन्धि:

3) पररूपसन्धि:

4) जश्त्वसन्धि:

---

Ques # :20

**' ष्टुना ष्टुः ' सूत्रसम्बद्धं सन्धिविच्छेदं निर्धारयत |**

1) उद् + ज्वल:

2) उत् + देश्यम्

3) उद् + डीन:

4) सत् + चरित्र:

---

Ques # :21

**' सत्यं वद ' इत्यत्र कः सन्धिः भविष्यति -**

1) श्चुत्वसन्धि:

2) अनुस्वारसन्धि:

3) पूर्वरूपसन्धि:

4) गुणसन्धि:

---

Ques # :22

**'कः + अयम् = कोऽयम्' इत्यत्र सूत्रनिर्देशः करणीयः |**

1) हशि च

2) रोरि

3) अतो रोरप्लुतादप्लुते

4) खरवसानयोर्विसर्जनीय:

---

Ques # :23

**'रामो जयति' इत्यस्य शुद्धसन्धिविच्छेदः कः ?**

1) रामश् + जयति

2) रामः + जयति

3) रामम् + जयति

4) राम + जयति

---

Ques # :24

**' विद्यैश्वर्यम् ' इति केन सूत्रेण भवति -**

1) वृद्धिरादैच्

2) वृद्धिरेचि

3) वृद्धस्य च

4) आद्गुणः

---

Ques # :25

**'झयो होऽन्यतरस्याम्' सूत्रेण सिद्धं भवति -**

1) वाग्घरिः

2) तच्छिवः

3) गुम्फ़ितः

4) वागीशः

---

Ques # :26

**निम्नलिखितोदाहरणेषु द्वन्द्वसमासः कस्मिन् प्रयोगे वर्तते-**

1) घनश्यामः

2) यथाशक्ति

3) दम्पती

4)

शाकपार्थिव:

---

Ques # :27

**निम्नलिखितविग्रहानुसारं द्विगुसमासं निर्धारयत -**

1) दण्ड: पाणौ यस्य स:

2) त्रयाणां भुवनानां समाहार:

3) पूर्ण: पुरुषः इति

4) कलासु कुशल:

---

Ques # :28

**निम्नलिखितविग्रहाननुसृत्य तत्पुरुषसमासस्य निर्णयः कर्त्तव्यः |**

1) नीलम् अम्बरं यस्य स:

2) क्षणे क्षणे इति

3) शीतञ्च मधुरञ्च

4) भूताय बलि:

---

Ques # :29

**'निर्विघ्नम्' इत्यत्र समासोऽस्ति-**

1) बहुव्रीहि:

2) अव्ययीभाव:

3) द्वन्द्व:

4) द्विगु:

---

Ques # :30

**'वृक्षपतित:' इत्यत्र समासोऽस्ति -**

1) अव्ययीभाव:

2) बहुव्रीहि:

3) कर्मधारय:

4) तत्पुरुष:

---

Ques # :31

**' विद्यानिपुण:' इत्यस्य विग्रह: क:?**

1) विद्याया: निपुण:

2) विद्यायां निपुण:

3) विद्यां निपुण:

4) विद्या निपुणः

---

Ques # :32

**कृष्णसारङ्ग: ' इत्यत्र समासोऽस्ति -**

1) बहुव्रीहि:

2) कर्मधारय:

3) षष्ठी तत्पुरुष:

4) द्वन्द्वः

---

Ques # :33

**' पञ्चवटी' इत्यत्र क: समास: ?**

1) अव्ययीभाव:

2) द्विगु:

3) द्वन्द्व:

4) द्वितीया - तत्पुरुष:

---

Ques # :34

**' मृगलोचना' अस्मिन् पदे समासः अस्ति -**

1) तत्पुरुषः

2) द्विगुः

3) द्वन्द्वः

4) बहुव्रीहिः

---

Ques # :35

**'अन्यपदार्थप्रधानो' इदं लक्षणमस्ति-**

1) द्वन्द्वस्य

2) बहुव्रीहेः

3) तत्पुरुषस्य

4) अव्ययीभावस्य

---

Ques # :36

**'त्यज्' धातोः क्त-प्रत्यये कृते किं रूपं भवति -**

1) त्यज्तः

2) त्यक्त्वत्

3) त्यक्तः

4) त्यजक्तः

---

Ques # :37

**'दृश्' धातोः तुमुन् प्रत्यये कृते किं रूपं भवति -**

1) दर्शितुम्

2) द्रशितुम्

3) द्रष्टुम्

4) पश्यतुम्

---

Ques # :38

**'संपृच्छय' इत्यत्र प्रत्ययोऽस्ति-**

1) ल्यप्
2) ण्यत्
3) यत्
4) क्यप्

---

Ques # :39

**' श्रवणम्' इत्यत्र 'श्रु' धातोः प्रत्ययोऽस्ति-**

1) ण्वुल्
2) शतृ
3) ल्युट्
4) शानच्

---

Ques # :40

**'पेयम्' इत्यत्र 'पा' धातोः प्रत्ययोऽस्ति -**

1) यत्
2) ण्यत्
3) क्यप्
4) ल्यप्

---

Ques # :41

**'भाव:' इत्यत्र 'भू' धातोः प्रत्ययोऽस्ति -**

1) ण्वुल्
2) क्ववतु
3) तव्यत्
4)

घञ्

---

Ques # :42

**'हन्' धातोः 'ण्वुल्' प्रत्यये कृते रूपं भवति -**

1) हातक:

2) घातक:

3) हन्वा

4) हनक:

---

Ques # :43

**" मतुप्" प्रत्ययस्य उदाहरणं निर्धारणीयम् -**

1) पुरुषः

2) गुणवान्

3) धनिक:

4) धूम:

---

Ques # :44

**'हर्ता' इत्यत्र प्रयुक्त प्रत्ययस्य विधायकं सूत्रं निर्धारयत -**

1) तदस्यास्त्यस्मिन्निति मतुप्

2) ल्युट् च

3) अचो यत्

4) ण्वुल् तृचौ

---

Ques # :45

**'ल्यप्' प्रत्ययस्य उदाहरणं निर्धारयत -**

1) हवनीयम्

2) बुद्धिमान्

3) स्वीकृत्य

4) देयम्

---

Ques # :46

**'सख्यौ' इति रूपस्य वचननिर्णय: करणीय:-**

1) एकवचनम्

2) द्विवचनम्

3) बहुवचनम्

4) द्विवचनं बहुवचनञ्च

---

Ques # :47

**'आसाम्' रूपमिदं कस्य शब्दस्य वर्तते ?**

1) तत्

2) अस्मद्

3) इदम्

4) एतत्

---

Ques # :48

**'स्त्री' शब्दस्य सप्तमीविभक्ते: एकवचने रूपम् यद् भवति, तद् निर्धारयत-**

1) स्त्रियम्

2) स्त्रियौ

3) स्त्रिया:

4) स्त्रियाम्

---

Ques # :49

**'मधु' शब्दस्य 'मधु' रूपस्य विभक्तिनिर्णयं कुर्वन्तु -**

1) तृतीया

2) प्रथमा द्वितीया च

3) चतुर्थी

4) सप्तमी

---

Ques # :50

**'पितृ' शब्दस्य पञ्चम्येकवचने रूपं भवति -**

1) पित्रे

2) पित्रा

3) पितु:

4) पितरात्

---

Ques # :51

**'आत्मन्' शब्दस्य तृतीयैकवचने रूपं भवति-**

1) आत्मन:

2) आत्मने

3) आत्मा

4) आत्मना

---

Ques # :52

**'गच्छत्' शब्दस्य द्वितीयाविभक्तौ बहुवचने रूपं भवति -**

1) गच्छन्

2) गच्छत:

3) गच्छन्त:

4) गच्छता

---

Ques # :53

**'नदी' शब्दस्य पञ्चम्यामेकवचने रूपं भवति -**

1) नद्य:

2) नद्या:

3) नदी:

4) नद्या

---

Ques # :54

**'जगत्' शब्दस्य प्रथमायां द्विवचने रूपं भवति-**

1) जगन्तौ

2) जगतौ

3) जगती

4) जगात्ति

---

Ques # :55

**'वारि' शब्दस्य सप्तम्यामेकवचने रूपं भवति-**

1) वारौ

2) वारिणि

3) वर्याम्

4) वारीणि

---

Ques # :56

**'अस्मद्' शब्दस्य सप्तम्यां विभक्तौ एकवचने रूपं भवति-**

1) मम

2) मया

3) मयि

4)

माम्

---

Ques # :57

**'वधू' शब्दस्य चतुर्थ्यामेकवचने रूपं भवति-**

1) वध्वै

2) वध्वे

3) वध्वो:

4) वधूभि:

---

Ques # :58

**'पक्ष्यति ' रूपमिदं कस्य धातो: वर्तते ?**

1) प्रच्छ्

2) पा

3) पच्

4) वृत्

---

Ques # :59

**'हन्ति' रूपस्य वचनं किम् ?**

1) एकवचनम्

2) द्विवचनम्

3) बहुवचनम्

4) एकवचनं बहुवचनञ्च

---

Ques # :60

**'अनम: ' रूपस्य लकारं निर्धारयत|**

1) लृट् लकार:

2) विधिलिङ् लकार:

3) लोट् लकार:

4) लङ् लकार:

---

Ques # :61

**'दृश्' धातोः लृटलकारे प्रथमपुरुषबहुवचने रूपं भवति-**

1) पश्यन्ति

2) दर्शष्यन्ति

3) दर्शयिष्यन्ति

4) द्रक्ष्यन्ति

---

Ques # :62

**'गम्' धातोः लङ्लकारे मध्यम-पुरुष-द्विवचने रूपं भवति-**

1) अगच्छत्

2) अगमतम्

3) अगच्छतम्

4) अगच्छाव

---

Ques # :63

**'सेव्' धातोःलट्लकारे मध्यमपुरुष-बहुवचने रूपं भवति-**

1) सेवत

2) सेवेताम्

3) सेवध्वे

4) सेवन्ते

---

Ques # :64

**'दा' धातोः लट्लकारे उत्तमपुरुषबहुवचने रूपं भवति-**

1) ददाम

2) दद्मः

3) ददानि

4) दद्याम

---

Ques # :65

**'कृ' धातोः लङ्लकारे उत्तमपुरुषबहुवचने रूपं भवति-**

1) अकुर्म

2) अकरवाम

3) अकुर्याम

4) अकुरुत

---

Ques # :66

**'चुर्' धातोः मध्यमपुरुषैकवचने विधिलिङ्लकारे रूपं भवति-**

1) चोरय

2) चुर्येम

3) चुर्यैः

4) चोरयेः

---

Ques # :67

**'न खलु धीमतां कश्चिदविषयः ' इत्यत्र अव्ययं किम् ?**

1) धीमतां

2) कश्चित्

3) खलु

4) अविषयः

---

Ques # :68

**अव्ययभिन्नं पदं किम् ?**

1) प्रात:

2) चिरम्

3) कदा

4) निन्दा

---

Ques # :69

**'चक्रं शनै: उच्चै: गच्छति' इत्यत्र कति अव्ययपदानि ?**

1) द्वे

2) त्रीणि

3) एकम्

4) चत्वारि

---

Ques # :70

**एषु उपसर्गो नास्ति -**

1) वि

2) आङ्

3) अति

4) पुन:

---

Ques # :71

**'सन्त: परीक्ष्यान्यतरद् भजन्ते' इत्यत्र उपसर्ग: कस्मिन् पदे अस्ति?**

1) सन्त:

2) भजन्ते

3) परीक्ष्य

4)

अन्यतरत्

---

Ques # :72

**'प्रत्यासीदति' इत्यत्र धातूपसर्गयोगः कः ?**

1) प्रति + आस्

2) प्रति + आ + सद्

3) प्र + त्यास्

4) प्रत्या + सीद्

---

Ques # :73

**अव्ययपदं निर्धारयत-**

1) गच्छत:

2) प्रात:

3) प्राप्त:

4) प्राप

---

Ques # :74

**प्रश्नार्थकमव्ययपदं निर्धारयत -**

1) अत्र

2) इत्थम्

3) कथम्

4) इदानीम्

---

Ques # :75

**कालवाचकमव्ययपदं किम् ?**

1) उच्चै:

2) अद्य

3) अत्र

4) नम:

---

Ques # :76

**'स्वागतम्' इत्यस्मिन् पदे प्रयुक्तोपसर्गनिर्णय: करणीय:-**

1) स्वा उपसर्ग: आङ् उपसर्गश्च

2) स्व उपसर्ग: आङ् उपसर्गश्च

3) सू उपसर्ग: आङ् उपसर्गश्च

4) सु उपसर्ग: आङ् उपसर्गश्च

---

Ques # :77

**उपसर्गस्य प्रयोजनं निर्धारयत-**

1) धात्वर्थपरिवर्तनम्

2) धातुस्वरूपोपस्थापनम्

3) स्वार्थाभिव्यक्ति

4) धातुप्रत्यययो: सम्बन्धसंयोजनम्

---

Ques # :78

**' उपान्वध्याङ्वसः ' इत्यत्र उपसर्गोपस्थितिं निर्धारयत -**

1) अस्ति उपसर्ग:

2) नास्ति उपसर्ग:

3) सन्ति उपसर्गा:

4) न सन्ति उपसर्गा:

---

Ques # :79

**एतेषु शुद्धं वाक्यं किम् ?**

1) सा विद्यालयात् प्रत्यावृत्य गृहमागच्छति |

2) सा विद्यालयं प्रत्यावृत्य गृहमागच्छति |

3) सा विद्यालयात् प्रत्यावृत्त्वा गृहमागच्छति |

4) सा विद्यालयात् प्रत्यावर्तनीय गृहमागच्छति |

---

Ques # :80

**एतेषु शुद्धं वाक्यं चिनुत -**

1) छात्र: गुरोः धर्ममपृच्छत् |

2) छात्र: गुरुणा धर्मम् अपृच्छत् |

3) छात्र: गुरुं धर्मम् अपृच्छत् |

4) छात्र: गुरु: धर्मम् अपृच्छम् |

---

Ques # :81

**अहं पाठं शक्नोमि | 'पाठं' इत्यस्य स्थाने शुद्धं रूपं भविष्यति -**

1) पठनं

2) पाठनं

3) पठित्वा

4) पठितुम्

---

Ques # :82

**विद्या सत्यात् शोभते | 'सत्यात्' इत्यस्य स्थाने शुद्धं रूपं भविष्यति -**

1) सत्येन

2) सत्यस्य

3) सत्ये

4) सत्यम्

---

Ques # :83

**वह और तुम पढ़ते हो | अस्य वाक्यस्य संस्कृतेन शुद्धः अनुवादः कः ?**

1) सः युवाञ्च पठति |

2) त्वं सः च पठतः |

3) सः त्वं च पठथः |

4) सः त्वं च पठावः |

---

Ques # :84

**'आदिकविः' इति नाम्ना कः प्रसिद्धः ?**

1) व्यासः

2) कालिदासः

3) वाल्मीकिः

4) सुबन्धुः

---

Ques # :85

**मुद्राराक्षसे किं नाट्यशास्त्रीयतत्त्वं न विद्यते -**

1) रसः

2) अलङ्कारः

3) राजनीतिः

4) नायिका

---

Ques # :86

**पण्डितपद्मशास्त्रिणः कृतिः का ?**

1) सुधीजनवृत्तम्

2) सिनेमाशतकम्

3) संस्कृतनाट्यवल्लरी

4)

विद्याधरसुन्दरी

---

Ques # :87

**किरातार्जुनीयमस्ति -**

1) खण्डकाव्यम्

2) महाकाव्यम्

3) नाट्यम्

4) गद्यकाव्यम्

---

Ques # :88

**'अविमारकम्' इत्यस्य नाटकस्य प्रणेता क: ?**

1) भास:

2) कालिदास:

3) कुमारदास:

4) शूद्रक:

---

Ques # :89

**'प्रत्यक्षरश्लेषमयी रचना ' का अस्ति ?**

1) कादम्बरी

2) दशकुमारचरितम्

3) वासवदत्ता

4) स्वप्नवासवादत्तम्

---

Ques # :90

**भर्तृहरिविरचितशतकत्रये किं नास्ति ?**

1) दृष्टान्तशतकम्

2) नीतिशतकम्

3) शृङ्गारशतकम्

4) वैराग्यशतकम्

---

Ques # :91

**'येनाङ्गविकार:' इत्यनेन सूत्रेण का विभक्ति: विधीयते ?**

1) द्वितीया

2) तृतीया

3) चतुर्थी

4) पञ्चमी

---

Ques # :92

**चतुर्थीविधायकं सूत्रं किम् ?**

1) भुव:प्रभव:

2) अकथितं च

3) कालाध्वनोरत्यन्तसंयोगे

4) रुच्यर्थानां प्रियमाण:

---

Ques # :93

**'निकषा' इत्यस्य योगे का विभक्ति: भवति ?**

1) द्वितीया

2) तृतीया

3) पञ्चमी

4) षष्ठी

---

Ques # :94

**'अनुवसति वैकुण्ठं हरिः' उदाहरणेऽस्मिन् कस्य सूत्रस्य उपयोगिता भवति ?**

1) उपान्वध्याङ्वस:

2) उपसर्गा: क्रियायोगे

3) हृक्रोरन्यतरस्याम्

4) अधिशीङ्स्थासां कर्म

---

Ques # :95

**'कालाध्वनोरत्यन्तसंयोगे' इत्यस्य उदाहरणं किम् ?**

1) श्व:आगमिष्यामि |

2) क्रोशं कुटिला नदी |

3) क्रोशेन अनुवाक: अधीत: |

4) अतिदेवान् कृष्ण: |

---

Ques # :96

**' .......... यमभिप्रैति स संप्रदानम्' इत्यत्र सूत्रस्य रिक्तस्थानं प्रपूरयत|**

1) कर्मणा

2) कर्त्रा

3) करणेन

4) उपकरणेन

---

Ques # :97

**'जगत: कर्त्ता कृष्ण:' उदाहरणेऽस्मिन् यस्य सूत्रस्य प्रवृत्तिः भवति तन्निर्धारयतु -**

1) कर्तृकर्मणोः कृति:

2) षष्ठी चानादरे

3) कर्तुरीप्सिततमं कर्म

4) कर्तृकरणयोस्तृतीया

---

Ques # :98

**'मासेन ग्रन्थोऽधीतः ' इत्यत्र तृतीया विधायकं सूत्रं किम् ?**

1) कर्तृकरणयोस्तृतीया

2) येनाङ्गविकार:

3) अपवर्गे तृतीया

4) साधकतमं करणम्

---

Ques # :99

**'यस्य च भावेन भावलक्षणम्' इत्यत्र 'भाव' इत्यस्य अर्थः अस्ति -**

1) मित्रम्

2) क्रिया

3) सात्त्विकभाव:

4) अनुभाव:

---

Ques # :100

**शुद्धं वाक्यं किम् ?**

1) शिशु: पर्यङ्क: अधिशेते

2) शिशु: पर्यङ्के अधिशेते

3) शिशु: पर्यङ्काय अधिशेते

4) शिशु: पर्यङ्कमधिशेते

---

Ques # :101

**'गां दोग्धि पयः' इत्यत्र कस्य सूत्रस्य उपयोगः भवति ?**

1) स्वतन्त्र कर्त्ता

2) कर्तुरीप्सिततमं कर्म

3) तथायुक्तं चानीप्सितम्

4)

अकथितं च

---

Ques # :102

**'स्वल्पमप्यस्य धर्मस्य त्रायते महतो-भयात्' अत्र कस्य सूत्रस्य प्रयोगः भवति-**

1) जनिकर्तुः प्रकृतिः

2) भुवः प्रभवः

3) भीत्रार्थानां भयहेतुः

4) अकथितं च

---

Ques # :103

**'........... क्रोधोऽभिजायते' रिक्तस्थानं पूरयत-**

1) कामम्

2) कामेन

3) कामात्

4) कामाय

---

Ques # :104

**'गवां गोषु वा कृष्णा बहुक्षीरा ' अत्र कस्य सूत्रस्य प्रयोगः अस्ति ?**

1) सप्तम्यधिकरणे च

2) षष्ठीशेषे

3) यतश्चनिर्धारणम्

4) अकथितं च

---

Ques # :105

**छन्दःशास्त्रे कति गणाः भवन्ति-**

1) दश

2) एकादश

3) पञ्चदश

4) अष्टौ

---

Ques # :106

**द्रुतविलम्बितछन्दसि प्रतिपादं कति वर्णाः भवन्ति ?**

1) एकादश

2) त्रयोदश

3) द्वादश

4) पञ्चदश

---

Ques # :107

**प्रतिपादमेकोनविंशतिवर्णसंयुतं किं वृत्तम् ?**

1) स्रग्धरा

2) शार्दूलविक्रीडितम्

3) मन्दाक्रान्ता

4) मालिनी

---

Ques # :108

**'त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव | त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव|' इत्यत्र वृत्तमस्ति-**

1) उपेन्द्रवज्रा

2) इन्द्रवज्रा

3) अनुष्टुप्

4) मालिनी

---

Ques # :109

**चतुर्भिर्यगणैः संयुतं वृत्तं किम् ?**

1) मालिनी

2) उपजाति

3) वंशस्थम्

4) भुजङ्गप्रयातम्

---

Ques # :110

**'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत |" श्लोकोऽयं कस्य छन्दसः उदाहरणम् अस्ति ?**

1) इन्द्रवज्रा

2) वंशस्थविलछन्द:

3) अनुष्टुप्

4) आर्या

---

Ques # :111

**'मालिनी' इति संज्ञकस्य छन्दसः प्रत्येक- पादे अक्षरसंख्या ...... भवति , इत्यस्य रिक्तस्थानं प्रपूरयत |**

1) 13

2) 17

3) 15

4) 11

---

Ques # :112

**प्रतिपादं चतुर्दशाक्षराणि भवन्ति -**

1) शिखरिणी

2) मन्दाक्रान्ता

3) वसन्ततिलका

4) स्रग्धरा

---

Ques # :113

**उपमेये उपमानस्य अभेदारोपे अलङ्कारो भवति -**

1) उपमा

2) सन्देह:

3) रूपकम्

4) भ्रान्तिमान्

---

Ques # :114

**यत्र केवलानां प्रस्तुतानाम् अथवा केवलानाम् अप्रस्तुतानां धर्मेणैकेन सह संबन्धो भवति, तत्र अलंकारोऽस्ति-**

1) तुल्ययोगिता

2) दृष्टान्त:

3) उपमा

4) उत्प्रेक्षा

---

Ques # :115

**' अविदितगुणापि सत्कविर्भणितिः कर्णेषु वमति मधुधाराम् | अनधिगतपरिमलापि हि हरति दृशं मालतीमाला |' इत्यत्र कोऽलंकारः ?**

1) उपमा

2) दृष्टान्त:

3) तुल्ययोगिता

4) निदर्शना

---

Ques # :116

**एकेनैव शब्देन मुख्यतया अर्थद्वयोपस्थितिः कस्मिन् अलंकारे भवति?**

1) यमके

2) अनुप्रासे

3) श्लेषे

4) सन्देहे

---

Ques # :117

**' सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा | नरेन्द्र मार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ||' इत्यत्र कोऽलंकारः ?**

1) उत्प्रेक्षा

2) उपमा

3) निदर्शना

4) व्यतिरेक:

---

Ques # :118

**कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम् | कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् || इत्यत्रालङ्कारं निर्धारयतु-**

1) दीपकम्

2) व्यतिरेक:

3) अर्थान्तरन्यास:

4) दृष्टान्त:

---

Ques # :119

**उपमानोपमेययोः यदा साधर्म्यं भवति तदा कोऽलङ्कारः भवति?**

1) रूपकम्

2) उपमा

3) उत्प्रेक्षा

4) निदर्शना

---

Ques # :120

**रिक्तस्थानं प्रपूरयत- ............अभवन् वस्तुसम्बन्ध उपमापरिकल्पक: |**

1) उपमा

2) सन्देह:

3) निदर्शना

4) तुल्ययोगिता

---

Ques # :121

**पुरुषसूक्तस्य ऋषि: क: वर्तते ?**

1) विश्वामित्र:

2) नारायण:

3) वसिष्ठ:

4) वामदेव:

---

Ques # :122

**देवानां दूत: क: मन्यते ?**

1) इन्द्र:

2) अग्नि:

3) विष्णु:

4) पर्जन्य:

---

Ques # :123

**कस्य देवस्य परमे पदे मध्व: उत्स?**

1) विष्णो:

2) इन्द्रस्य

3) अग्ने:

4) वरुणस्य

---

Ques # :124

**कः पर्वतेषु क्षियन्तं शम्बरम् अविन्दत् ?**

1) वरुण:

2) अग्नि:

3) विष्णु:

4) इन्द्र:

---

Ques # :125

**'विद्ययाऽमृतमश्नुते' मन्त्रांशोऽयम् कस्मिन् ग्रन्थे विद्यते ?**

1) ऋग्वेदे

2) शतपथब्राह्मणे

3) ईशोपनिषदि

4) अथर्ववेदे

---

Ques # :126

**'प्रजहाति यदा कामान् सर्वान् पार्थ ......| इत्यत्र रिक्तस्थानं प्रपूरयत-**

1) अवगतान्

2) मनोगतान्

3) प्रतिष्ठितान्

4) प्रकल्पितान्

---

Ques # :127

**'अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ' इत्यत्र 'अयम्' इत्यनेन कोऽभिप्रेत: ?**

1) शरीरम्

2) वायु:

3) आकाश:

4)

शरीरी

---

Ques # :128

**पञ्च महायज्ञेषु किं नास्ति -**

1) अश्वमेधयज्ञ:

2) ब्रह्मयज्ञ:

3) देवयज्ञ:

4) पितृयज्ञ:

---

Ques # :129

**ज्येष्ठो ..... आश्रम: ?**

1) वानप्रस्थ:

2) सन्यास:

3) ब्रह्मचर्य:

4) गृहस्थ:

---

Ques # :130

**षोडशसंस्कारेषु न गण्यते -**

1) कर्णवेध:

2) अन्नप्राशनम्

3) निष्क्रमणम्

4) पाठनम्

---

Ques # :131

**अनुवाद-विधौ अयं सिद्धान्त :-**

1) कठिनात् सरलम् प्रति

2) अज्ञातात् ज्ञातं प्रति

3) दुर्बोधात् सुबोधम् प्रति

4) संपूर्णात् अङ्गं प्रति

---

Ques # :132

**गद्यशिक्षणस्य विधि: नास्ति-**

1) उद्बोधन-विधि:

2) प्रवचन-विधि

3) स्पष्टीकरण-विधि:

4) टीका-विधि:

---

Ques # :133

**छात्रेषु रागात्मकभावविकासे का पाठयोजना उपयोगिनी भवति-**

1) नाटक-पाठ-योजना

2) पद्य-पाठ-योजना

3) अनुवाद-पाठ-योजना

4) व्याकरण-पाठ-योजना

---

Ques # :134

**प्रश्नोत्तरविधि: कं न अपेक्षते ?**

1) प्रतिध्वनिरूपप्रश्नम्

2) स्पष्टप्रश्नम्

3) पाठानुरुपप्रश्नम्

4) उचितप्रश्नम्

---

Ques # :135

**सूक्ष्मशिक्षणे शिक्ष्यते -**

1) कौशलानां विकास:

2) भावावबोध:

3) विभिन्नविधिप्रयोग:

4) पदार्थबोध:

---

Ques # :136

**प्रस्तावना प्रश्नस्य हेतुः अस्ति -**

1) कृत्रिमप्रस्तावना हेतु:

2) सामाजिकसम्बन्धस्य स्थापना

3) अध्येत्रा सायुज्यम् एवं विषयनिर्धारणम् च

4) सामान्यमानव वर्तनम्

---

Ques # :137

**पद्य-शिक्षणे व्यासविधिः कथ्यते-**

1) व्याख्याविधि:

2) भाष्यविधि:

3) खण्डान्वयविधि:

4) दण्डान्वयविधि:

---

Ques # :138

**शिक्षायाः वाचिकपरम्परायां किमुपकरणं सहायकं नास्ति -**

1) ध्वनि-अभिलेख:(टेपरिकॉर्डर इति)

2) भाषा-पञ्जिका(लिंग्वाफोन इति)

3) सम्भाषणम्

4) आकाशवाणी(रेडियो इति)

---

Ques # :139

**पठनकार्य द्विध्रुवीयं भवतु एतदर्थं कस्याः प्रयुक्तेः सर्वाधिकः प्रयोगः भवति-**

1) आगमनप्रयुक्तिः

2) निगमनप्रयुक्तिः

3) उदाहरणप्रयुक्तिः

4) प्रश्नोत्तरप्रयुक्तिः

---

Ques # :140

**लेखनकौशलाभिवृद्धये का पद्धतिः उपयोगिनी न भवति ?**

1) अनुकरणपद्धतिः

2) जेकटॉट्पद्धतिः

3) मॉण्टेसरीपद्धतिः

4) प्रत्यक्षपद्धतिः

---

Ques # :141

**माध्यमिक-कक्षायां भाषाशिक्षणे अतीव प्राधान्यता अस्ति-**

1) अर्थकाठिन्यस्य

2) तत्त्वालोचनस्य

3) भाषाज्ञानम् एवं भावनिर्माणसामर्थ्यस्य

4) जीवनस्य जटिलतायाः ज्ञानस्य

---

Ques # :142

**कक्षायां श्रवणकौशलप्रवर्धने किं नास्ति सहायकम् ?**

1) आदर्शपाठः

2) ध्वनिमुद्रिका-श्रवणम्

3) श्यामपट्टप्रयोगः

4)

छात्र-संवाद:

Ques # :143

**नाटकशिक्षणस्य सर्वोत्तमः विधिः कः ?**

1) कक्षाभिनयविधि:

2) समवायविधि:

3) रंगमंचाभिनयविधि:

4) व्याख्याविधि:

Ques # :144

**संस्कृतभाषाशिक्षणे अयं विधिः उत्तमः:-**

1) प्रायोजनाविधि:

2) व्याकरणानुवादविधि:

3) अव्याकृतिविधि:

4) प्रत्यक्षविधि:

Ques # :145

**श्रव्य-दृश्योपकरणानां विशिष्टा भूमिका वर्तते -**

1) शिक्षकस्य प्रतिष्ठायै

2) विषयस्य उपस्थापने

3) अधिगमप्रक्रियायाम्

4) पाठयोजनाया: अलङ्करणे

Ques # :146

**संस्कृत शिक्षकस्य प्रथमं कर्तव्यमस्ति?**

1) संस्कृतसाहित्यस्य ज्ञाता

2) संस्कृतसाहित्यं प्रति अभिप्रेरक:

3) संस्कृतभाषाया: ज्ञाता

4) व्याकरणस्य ज्ञाता

---

Ques # :147

**अनल:' इति शब्दस्य अर्थ-द्योतनाय सर्वोत्कृष्टा प्रणाली अस्ति -**

1) उपसर्ग:

2) सन्धिविच्छेद:

3) समासविग्रह:

4) पर्यायकथनम्

---

Ques # :148

**संग्रंथनोपागमः प्रयुज्यते -**

1) नाटकशिक्षणे

2) गद्यशिक्षणे

3) अनुवादशिक्षणे

4) व्याकरणशिक्षणे

---

Ques # :149

**छात्रेषु स्वाध्यायस्य अभ्यासः केन प्रकारेण वर्धयितुं शक्यते -**

1) स्वाध्यायिनां विदुषामुदाहरणानि प्रदाय

2) स्वाध्यायविषये भाषणानि प्रदाय

3) शिक्षाप्रदं रोचकं साहित्यं प्रदाय

4) स्वस्य उदाहरणं प्रदाय

---

Ques # :150

**अध्यापकेन प्रश्नः प्रष्टव्य :-**

1) प्रथमं कमपि छात्रं निर्दिश्य

2) समग्रकक्षाम् निर्दिश्य

3) समूहविशेषं निर्दिश्य

4) छात्रविशेषं निर्दिश्य

---